**शिखिताम्बर** पु० शिखितान्यम्बराणि येन। १काले २शिखादातरि सुरौ च त्रिका०।

**शिख** गतौ भ्वा०पर०सक०सेट् इदित्। शिङ्खति अशिङ्खीत्।

**शिखण्ड** पु० शिखामणति अण–ड तस्य नेत्त्वम्, इत० शक० वा। १मयूरपिच्छे अमरः। २चूडायाञ्च मेदि०।

**शिखण्डक** पु० शिखण्ड इव कन्। १काकपक्षे अमरः। ( काकलुल्ली ) क्लीवत्वमपि तत्र। सा च २चूडायाञ्च हेमच०। [स्त्रियां ङीप्।

**शिखण्डिक** पुंस्त्री० शिखण्डोऽस्त्यस्य ठन्। कुक्कुटे हेमच०

**शिखण्डिन्** पु० शिखण्डोऽस्त्यस्य इनि। १मयूरे २द्रुपदराजस्य पुत्रभेदे मेदि०। ३मयूरपुच्छे ४कुक्कुटे ५बाणे च हेमच०। ६गुञ्जायां ७स्वर्णयूथिकायां राजनि०। ८विष्णौ विष्णु स० ९यूथिकायां स्त्री ङीप् मेदि०।

**शिखर** न० शिखा अस्त्यस्य अरच् अलोपः। १पर्वताग्रे २वृक्षाग्रे च। ३द्रुमाग्रे पु०न० अमरः। ४पुलके ५सु-क्वणादौ पक्वदाडिमबीजाभे ६रत्नभेदे ७अग्राग्रे मेदि०। ८कोटौ त्रिका०। ९मूर्वायां स्त्री शब्दच०।

**शिखरवासिन्** त्रि० शिखरे वसति वस–णिनि ७त०। पर्वतान्तर्वासिनि स्त्रियां ङीप्। "देवी शिखरवासिनी" चण्डी: सा च हिमालयवासिन्यां २दुर्गायां त्रिका०।

**शिखरिन्** पु० शिखराऽस्त्यस्य इनि। १पर्वते २वृक्षे ३अपामार्गे मेदि०। ४दुर्गे ५कोयष्टौ हेमच०। ६वन्दाके ७कुन्दुरुके ८यावनाले ९कर्कटशृङ्ग्यां राजनि०। १०रसालायां खाद्यभेदे स्त्री। ११षष्ठदशाक्षरपादके छन्दोभेदे स्त्री "रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी" वृ०र०। १२मल्लिकायां १३रोमावल्यां १४नारीरत्ने च स्त्री मेदि० सर्वत्र ङीप्। [ ( कुक्कुरचुड़ा ) क्षुपभेदे रत्नमा०।

**शिखलोहित** पु० शिखाग्रमस्त्यस्य अच् तथाभूतः सन् लोहितः।

**शिखा** स्त्री शी–खक् तस्य नेत्त्वम् उणा०। १अग्निज्वालायां २मस्तकमध्यस्थकेशगुच्छे च अमरः। "सवस्त्रेत सर्वगात्राणि कण्ठोपस्थशिखां वह्निः" प्रा०त०। ३शाखायां ४बर्हिचूडायां ५लाङ्गलिक्याम् ६अग्रमात्रे ७चूडामात्रे ८प्रपदे च मेदि०। ९प्रधाने शिफायां १०ऋषभौ हेमच०। ११कामज्वरे शब्दच०।

"शिखी नित्यकौ कर्म कुर्यात्" इत्युक्त्या शिखावत एव कर्मसर्वाधिकारः तथापि बद्धशिखस्य कर्मस्वधिकारः न मुक्तशिखस्य यथोक्तं "गायत्र्या तु शिखां बद्धा नैर्ऋत्यां ब्रह्मरन्ध्रतः। जूटिकाञ्च ततो बद्धा ततः कर्म समारभेत्"। "निबद्धशिख आसीनो द्विज आचमनं चरेत्। कृत्वोपवीतं सव्येऽंसे वाङ्मनःकायसंयतः"। मुक्तशिखस्याचमने दोषो यथा "शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा। अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्" आ०त०।

**शिखाकन्द** न० शिखेव कन्दोऽस्य। गृञ्जने राजनि०।

**शिखातरु** पु० शिखाया दीपशिखायास्तरुरिव। दीपवृक्षे (देलको) त्रिका०।

**शिखाधर** पुंस्त्री० शिखां चूडां धरति धृ–अच्। १मयूरे रत्नमा० स्त्रियां ङीष्। २शिखाधारके त्रि० स्त्रियां टाप्। ३मञ्जुघोषे पु० त्रिका०।

**शिखामूल** न० शिखेव मूलमस्य। गृञ्जने (गाँजर) राजनि०

**शिखालु** पु० शिखाऽस्त्यस्य आलुच्। मयूरशिखावृक्षे राजनि०

**शिखावत्** पु० शिखा अस्त्यस्य मतुप् मस्य वः। १वह्नौ २चित्रकवृक्षे च अमरः। ३केतुग्रहे शब्दच०। ४शिखायुते त्रि० स्त्रियां ङीप्। सा च ५मूर्वायां शब्दच०

**शिखावर** पु० शिखां वृणोति वृ–अच्। पनसवृक्षे शब्दच०

**शिखावल** पुंस्त्री० शिखाऽस्त्यस्य वलच्। १मयूरे अमरः। स्त्रियां ङीष्। २मयूरशिखावृक्षे स्त्री राजनि० टाप्।

**शिखावृद्धि** स्त्री प्रतिदिनप्राप्यवृद्धौ कुसीदशब्दे दृश्यम्।

**शिखिकण्ठ** न० शिखिनो मयूरस्य कण्ठस्येव वर्णोऽस्त्यस्य अर्श आद्यच्। तुत्थे (तुँते) रत्नमा०।

**शिखिग्रीव** पु० शिखिनो मयूरस्य ग्रीवा तद्वर्णोऽस्त्यस्य अच्। तुत्थे ( तुँते ) अमरः।

**शिखिध्वज** शिखिनो वह्नेर्ध्वज इव। १धूमे त्रिका०। शिखी मयूरो ध्वजो यस्य। २कार्त्तिकेये शब्दच०।

**शिखिन्** पु० शिखा अस्त्यस्य इनि। १मयूरे २वह्नौ ३चित्रकवृक्षे अमरः। ४केतुग्रहे ५कुक्कुटे ६वृक्षे ७वृषे ८शरे च मेदि०। ९अश्वे हेमच० १०अजलोम्नि रत्नमा० ११पर्वते १२ब्राह्मणे १३शितावरे १४मेथिकायां राजनि० १५शिखायुक्ते त्रि० १६मयूरशिखावृक्षे राजनि० स्त्री ङीप्।

**शिखिप्रिय** पु० शिखिनं प्रीणयति प्री–क। लघुबदरे राजनि०।

**शिखिमण्डल** पु० शिखिनां मण्डलमिव यस्य। वरुणवृक्षे शब्दर०। [अजमोदायां राजनि०।

**शिखिमोदा** स्त्री शिखिनः अजलोम्न इव मोदो यस्याः।

**शिखियूप** पु० शिखी शिखावान् यूप इव। ओकारिणि मृगे राजनि०। [कुष्माण्डे शब्दर०

**शिखिवर्द्धक** पु० शिखिनं वर्द्धयति वृध–णिच्–ण्वुल्।